# रहस्यामृतमहाकाव्यस्य परिचयः कथावस्तुविमर्शश्च

**Avijit Mandal**
Research Scholar, Department of Literature,
National Sanskrit University,
Tirupati, Andhra Pradesh
Vidyalaya Adhyapak, Department of Education
Bihar Public Service Commission, Bihar, India
Email: avijitmandal2402@gmail.com

**Abstract**: अस्माकं पुण्यभूमिः भारतवर्षम्। महामनीषिणाम् ऋषीणाम् आदर्शभूतेयं भूमिर्भवति। अत्रानेके कवयः प्रादूर्भूताः, तेषां बहुमूल्यकृतिभिः सुसमृद्धं संस्कृतवाङ्मयमद्यावधि अनवरुद्धतया वर्धते। भारतस्य प्रत्येकमपि राज्यमेतैः सुकृतिभिः कविभिः सदा सुप्रतिष्ठितं श्रृङ्खलितं चावलोक्यते। अस्माकं देशे बहवः सुरवाणीसेवका: प्रादुर्भूय संस्कृतसाहित्यं सेवमानाः वर्तन्ते, किन्तु अद्यावधि तेषां महात्मनां जीवनवृत्तं यथायथं ज्ञातुं न शक्यते। रहस्यामृतकाव्यप्रणेतुस्तत्रभवतो श्रीबाणेश्वरविद्यालङ्कारभट्टाचार्य-महोदयस्य जीवनवृत्तमपि तथैव। सः कस्मिन् माहेन्द्रक्षणे जन्मालभत इति विशेषतया वक्तुं न शक्यते। तस्य नैकाः कृतयः सरस्वतीसभामण्डपे पुष्पमालासदृशाः विराजन्ते।

**Keywords:** श्रीबाणेश्वरविद्यालङ्कारभट्टाचार्यः, शोभाकरवंशः, रहस्यामृतम्, श्रीपार्वत्युत्पत्तिः, शिवपार्वतीविवाहः, वाराणसीनिर्माणम्, वसन्तकालः

**कविपरिच्चयः —**

संस्कृतसाहित्ये वङ्गीयानां योगदानमद्वितीयमस्ति, न केवलं साहित्ये अपितु व्याकरण-ज्योतिषदर्शनगणिततन्त्रशास्त्रवास्तुशास्त्रायुर्वेदादिषु सर्वेष्वपि शास्त्रेषु निष्णाताः पण्डितप्रकाण्डाः अत्रासन्। संस्कृतसाहित्यगगने उज्ज्वलज्योतिष्कस्वरूपाणां महाकवीनां मध्ये रहस्यामृतमहाकाव्यस्य रचयितुः श्रीबाणेश्वरविद्यालङ्कारभट्टाचार्यमहोदयस्य महत्त्वपूर्णं स्थानं वर्तते। श्रीबाणेश्वरविद्यालङ्कार-भट्टाचार्यः वङ्गसन्तानः आसीत्। आनुमानिक-1665 खृष्टाब्दे हुगलीजनपदस्य गुप्तिपाडा-इत्याख्ये स्थाने सद्ब्राह्मणपरिवारे प्रख्यातशोभाकरवंशे तस्य जन्म अभूत्। तस्य पिता शोभाकरगोत्रीयः नैयायिकः रामदेवतर्कवागीशः आसीत्। पितामहस्य नाम विष्णुसिद्धान्तभट्टाचार्यः। शैशवादेव सोऽसाधारण: मेधावी आसीत्। प्रतिभा तस्य वहुमुखी। यथा काव्येषु तथा नाटकादिषु तस्य लेखनी धन्या।

श्रीबाणेश्वरविद्यालङ्कारभट्टाचार्यमहोदयः नदीयामण्डलस्य नवद्वीपाधिपतेः राज्ञः महाराजकृष्णचन्द्र-रायस्य राजसभायां नवरत्नेषु अन्यतमः श्रेष्ठरत्नमासीत्। संस्कृतभाषायां तथा साहित्ये तस्य अगाधपाण्डित्यमासीत। संस्कृतविदुषां शिक्षार्थिनां च कृते सः बहून् ग्रन्थान् व्यरचयत्। अद्यावधि बाणेश्वरस्य नव काव्यरत्नानि आविष्कृतानि सन्ति।

***रहस्यामृतम्*** — रहस्यामृतं श्रीबाणेश्वरविद्यालङ्कारभट्टाचार्येण विरचितमेकं महाकाव्यम्। अस्मिन् ग्रन्थे शिवपार्वत्योः विवाहस्य हृदयहारिणी कथा कविना मुख्यविषयरूपेण उपनिबद्धा। महादेवेन सह पार्वत्याः विवाहात् काशीधामे अधिष्ठानपर्यन्तमस्मिन् महाकाव्ये वर्णितमस्ति।

कृपारामघोषानुरोधेन काशीधाम्नि कालिदासविरचितस्य कुमारसम्भवस्य आख्यानमवलम्ब्य श्रीबाणेश्वरविद्यालङ्कारभट्टाचार्यमहोदयः स्वप्रतिभया नवीनं महाकाव्यमिदं रचयामास। कविनात्र कालिदासवर्णितशिवपार्वतीकथा बहुधा परिवर्तिता। शिवपार्वतीकथा वेदे, पुराणेऽपि उपलभ्यते। यथा— श्रीपार्वत्युत्पत्तिः, शिवाश्रमदर्शनः, पार्वतीपरिचर्यानियुक्तिः, पार्वतीतपःप्रवृत्तिः, रतिविलापः, पार्वतीतपश्चरणः, गंगाम्भसि पतनम्, ईशस्तुतिः, पार्वतीरूपगुणवर्णनम्, शिवदोष-वर्णनम्, शिवप्राप्तिः/ शिवप्रसादः, तपःफलोदयः, शिवपार्वतीपरिणयः, हरपार्वतीरहस्यम्, वाराणसीपरिचयः, वाराणसीनिर्माणम्, शिवयोः पूजनम्, शिवरामसमागमः, त्रैलोक्यराज्ये अच्युताभिषेकश्चेति। संस्कृतकाव्यप्रपञ्चे 'रहस्यामृतम्' अतीव उत्कृष्टपदमलङ्करोति। काव्येऽस्मिन् विंशतिसर्गेषु ६१४ श्लोकाः सन्ति।

| **सर्गः** | **श्लोकसंख्या** | **सर्गशीर्षकम्** |
|---|---|---|
| 1. | 32 | श्रीपार्वत्युत्पत्तिः |
| 2. | 71 | शिवाश्रमदर्शनः |
| 3. | 22 | पार्वतीपरिचर्यानियुक्तिः |
| 4. | 25 | पार्वतीतपःप्रवृत्तिः |
| 5. | 52 | रतिविलापः |
| 6. | 26 | पार्वतीतपश्चरणः |
| 7. | 32 | गंगाम्भसि पतनम् |
| 8. | 25 | ईशस्तुतिः |
| 9. | 23 | पार्वतीरूपगुणवर्णनम् |
| 10. | 43 | शिवदोष-वर्णनम् |
| 11. | 13 | शिवप्राप्तिः/शिवप्रसादः |
| 12. | 31 | तपःफलोदयः |
| 13. | 68 | शिवपार्वतीपरिणयः |
| 14. | 32 | हरपार्वतीरहस्यम् |
| 15. | 21 | वाराणसीपरिचयः |
| 16. | 23 | वाराणसीनिर्माणम् |
| 17. | 14 | शिवयोः पूजनम् |
| 18. | 14 | शिवरामसमागमः |
| 19. | 17 | महाभोजनम् |
| 20. | 30 | त्रैलोक्यराज्ये अच्युताभिषेकः |

श्रीबाणेश्वरविद्यालङ्कारभट्टाचार्यकृतस्य 'रहस्यामृतम्' इति महाकाव्यस्य वैशिष्ट्यं कतिपयैः शब्दैः प्रतिपाद्यते। स्वयं लेखकः एव मङ्गलश्लोकैरगर्हितभीष्टसिद्धिरूपं समुचितविघ्ननाशकदेवनमस्कारात्मकं मङ्गलं ग्रन्थस्य समग्रस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारार्थं ग्रन्थादौ निबध्नन् ग्रन्थविषये ब्रवीति—

ॐ नमो महागणपतये

"या शर्वादिसुपर्वदुर्वचमहाध्यानाध्वदूरे स्थिता
सर्वाभीप्सितकल्पवल्लिरतुला दुर्वारदुःखापहा।
चूडोल्लासितशर्वरीमनिकला खर्वान्यखर्वा महा-
गर्वा पर्वतसार्वभौमतनया भूयान्महाभूतये।।"

अत्र नायकः देवादिदेवः महादेवः, नायिका च जगज्जननी माता पार्वती। श्रीबाणेश्वरविद्यालङ्कारभट्टाचार्यस्य रचनाशैली अतिरम्या सरला च। काव्यमिदं श्रृङ्गाररसप्रधानम्। व्यञ्जनावैचित्र्यमस्य रचनासु सर्वत्र चित्रितम्। कवेः वाग्भङ्गी विचित्रा अलङ्कारप्रयोगे च स खलु अनन्यसदृशा। सर्गक्रमेण कथावस्तुनो विवरणमित्थमस्ति—

**प्रथमसर्गः** — अस्य सर्गस्य प्रारम्भे महाकविना जगत्काल्याणाय पार्वतीरूपिण्या आदिशक्त्याः मङ्गलाचरणं कृतम्। सा त्रिपुरेश्वरी, निर्भया, दुष्टानां भयदायिनी। सा सती प्रजापतेः यज्ञे आत्माहुतिं दत्त्वा पुनः शुभे मुहूर्ते हिमालयगृहे जन्म अलभत्। तस्याः दिव्यं तेजस्वि रूपं चन्द्रकलाकोटिसमानं शोभते। पार्वती स्वप्रतिविम्बं दृष्ट्वा हसति, शिवं स्मरन्ती विरहवेदनाञ्च अनुभवति। सा बाल्येऽपि दिव्यतेजसा क्रीडति स्म, शोकञ्च करोति स्म। तस्याः बालोचितानि वाक्यानि हिमालयमेनयोः हर्षवर्धकानि आसन्। सा आदिकारणप्रकृतिस्वरूपा विश्वस्य कल्याणाय हिमालयस्य दुहितारूपेण आविर्भूता।

**द्वितीयसर्गः** — द्वितीयसर्गे पार्वत्याः कौमार्यं, दिव्यसौन्दर्यं, तपः च वर्ण्यन्ते। सा शिवं स्मृत्त्वा विषण्णा जाता, किञ्च तत्कृते कठिनं तपः आचरत्। पार्वत्याः रूपं सौन्दर्येण तत्त्वज्ञानेन च भूषितम्। तारकासुरः देवान् जीत्वा उत्पातं कृतवान्। सतीशरीरविलयेन शिवः योगसमाधौ स्थितः आसीत्। सती पार्वतीरूपेण पुनः जनिं लेभे। हिमवान् हैमवत्याः सह शिवाश्रमं गत्त्वा तपोनिष्ठं तेजोमयं शिवमपश्यत्। अत्र शिवपार्वत्योः दिव्यसंयोगस्य, सौन्दर्यस्य, भक्तेश्च गम्भीरं वर्णनं दृश्यते।

**तृतीयसर्गः** — तृतीयसर्गे तावत् पर्वतराजः हिमालयः शिवस्य तपोभूमिम् आगत्य तं समाधिस्थं तेजोमयं शिवं दृष्ट्वा अत्यन्तं विस्मितः, आनन्दितश्च अभवत्। पूर्वतपसः फलरूपेण पार्वत्याः जन्म शिवदर्शनं च प्राप्तमिति सः अचिन्तयत्। वनस्य सौन्दर्यं, शान्ततां, योगिनां साधनास्थलानि च दृष्ट्वा स विस्मयाविष्टः अभवत्। ततः शिवं दृष्ट्वा सः भक्तिभावेन स्तुतिं कृतवान् — "त्वं त्रिनेत्रः, अर्धनारीश्वरः, संहारकर्ता, सर्वाधिष्ठानरूपः, भक्तवत्सलः च।" स्तुतिपरान्ते हिमालयः पार्वत्यै शिवस्य महिमानं निवेद्य तस्य सेवा करणीयेत्युपदेशं दत्तवान्। पश्चात् स भक्तिपूर्वकं शिवं प्रणम्य स्वगृहं प्रतिनिवृत्तः।

**चतुर्थसर्गः** — अस्मिन् सर्गे पर्वतराजः हिमालयः शिवस्य तपोभूमिम् आगत्य तं समाधिस्थं तेजोमयं शिवं दृष्ट्वा अत्यन्तं विस्मितः, आनन्दितश्च जातः। पूर्वतपसः फलरूपेण पार्वत्याः जन्मं, शिवदर्शनं च प्राप्तमिति स चिन्तयति। वनस्य सौन्दर्यं, शान्तता, योगिनां साधनास्थलानि च दृष्ट्वा स विस्मयाविष्टः अभवत्। ततः शिवं दृष्ट्वा सः भक्तिभावेन स्तुतिं कृतवान्– "त्वं त्रिनेत्रः, अर्धनारीश्वरः, संहारकर्ता, सर्वाधिष्ठानरूपः, भक्तवत्सलः च।" स्तुतिपरान्ते हिमालयः पार्वत्यै शिवस्य महिमानं निवेद्य तस्य सेवा करणीयेति उपदेशं दत्तवान्। पश्चात् स भक्तिपूर्वकं शिवं प्रणम्य स्वगृहं प्रतिनिवृत्तः।

**पञ्चमसर्गः** — अत्र तावत् भगवान् शिवः ध्यानभङ्गात् कोपेन त्रिनेत्राग्निना कामदेवं दग्धवान्। तदा पतिव्रता रतिः पतिवियोगेन अत्यन्तदुःखिता भूत्वा विलापं कृतवती। सा महादेवं प्रति करुणास्वरेण प्रेमवियोगजन्यवेदनां व्यक्तवती। कामदेवं विना स्वस्य जीवनम् अपूर्णम् इति ज्ञात्वा सा तस्य भस्मरूपं शरीरम् आलिङ्गितुं च इच्छति स्म। तया विरहदुःखं हृदयस्पर्शिवाण्या व्यक्तम्। अन्ते दैवीवाणीं श्रुत्वा रतिः

मायया कामदेवस्य रूपं रक्षितवती, तथा च अधर्मिणां नगरं गता। ततः परं सा रतिः विरहवेदनासहितं भर्तुः पुनरागमनस्य आशया जीवनं यापयति स्म।

**षष्ठसर्गः** — अस्मिन् सर्गे पार्वत्याः उग्रतपसः मनोहरं वर्णनं कृतमस्ति। सा मातृपितृसखीनां निवारणम् अपि न श्रुतवती, शिवलाभाय दृढसंकल्पा अभवत्। मृत्तिकया निर्मिते कुञ्जे निवसन्ती सा हिमालयकन्या वन्यभोज्यैः जीवनं यापयन्ती अतीव घोरं तपः अकरोत्। शतसूर्यतापैः दग्धा, वर्षधाराभिः शीतला च भूत्वा या तपसा कृशा जाता, सा सर्वं भुवनं कम्पयामास। तस्या उग्रतपसः प्रभावेण नभः, दिशः, नद्यः, मेघाः, पशवः अपि विकृताः अभवन्। देव्योऽपि तस्यास्तपसा कम्पमाना अश्रुपातं कृत्वा विलपन्ति स्म। एतत् सर्वं पार्वत्याः शिवप्राप्तेः पात्रतां सूचयति।

**सप्तमसर्गः** — अस्मिन् सर्गे पार्वत्याः गङ्गया सह दिव्यसम्बन्धः, तपसः महिमा च मुख्यतया दृश्येते। सा प्रथमं सूर्यतापेन दग्धा, पञ्चतपेन दग्धा, महादेवविरहेण च दग्धा जाता। गङ्गा हिमालयात् उत्पन्ना, मेघजलैः आलिङ्गिता तां स्नात्वा पापानि नाशयति, स्वधामं प्रत्यागच्छति च। नदीतीरं पुष्पैः शोभमानं, परंतु तारकाः अपहसन्ति। चन्द्र-किरण-वारिजैः मुक्ताफलराशयैः तं भ्रमोत् जातं यद् तारा आकाशे अतः जलमध्ये? गङ्गा आत्मनः मुखरूपेण पद्मं धृता, देवसहिता सर्वान् आनन्दयति। कमलिनी भूत्वा, हिमशीतलेन कमलाकरः अपि पराजितः। हिमागमने हिमालयो रुष्टः, जनाः जानन्ति यत् गङ्गा शिवशिरसि प्रवहन्ती सा परीक्षणाय समृद्धा। एवं सा तपसा गङ्गामेकीकृत्य, स्वर्णगङ्गां प्रविश्य, स्वस्य तेजसा तां पराजयति।

**अष्टमसर्गः** — अस्मिन् सर्गे दृश्यते यत् वसन्तकाले आगतेऽपि तपोवनस्थिता पार्वती कठोरं तपः अकरोत्। सा पुष्पैः, फलैः, धूपैः, दीपैः च शिवपूजां सम्यक् अकार्षीत्। ध्यानयोगेन शिवं हृदये धारयित्वा भक्त्या स्तुतिं चकार। शिवं प्रति तया प्रार्थितं यत् – "हे दीनदयालो! त्वम् अमृतं त्यक्त्वा विषं पीतवान्। तव कृपया सर्वं साध्यं भवति।" एवम् अनन्यभक्त्या सा शिवकृपां प्राप्तुम् ऐच्छत्।

**नवमसर्गः** — नवमसर्गे भगवान् शिवः ब्राह्मणवेशं धारयन्नाकाशात् पृथिवीं प्राविशत्। उज्ज्वलरूपधारी सः विप्रः पार्वत्याः तपोवनं समागतः। पार्वत्याः सख्यौ जयविजये तं ब्राह्मणं सादरं पूजार्हमन्येताम्। तेन पार्वत्याः तपस्याः प्रयोजनं पृष्टम्। ततः सख्यौ पार्वत्याः कठोरतपसः प्रयोजनं तत्सकाशान् न्यवेदयताम्। ब्राह्मणरूपी शिवः तस्या अद्वितीयं रूपं, सौन्दर्यं च वर्णयन् उक्तवान् यत् अमृतमपि तस्याः हास्ये नगण्यम्। तस्याः शोभा चन्द्रस्यापि शोभामतिक्रान्तवती इति निगद्य मौनमतिष्ठत्।

**दशमसर्गः** — अत्र तावत् वर्णितमस्ति यच्छिवः ब्राह्मणरूपं धृत्वा पार्वत्याः तपसः परीक्षां कर्तुं तपोवनं जगाम। सः पार्वत्यै देवानां दोषान् कथयित्वा शिवमपि निनिन्द —"सः वंशहीनः, अशौच्यवेशधारी, श्मशानवासी, विषभक्षकः, भूतपिशाचप्रियः" इति। तया शिवो न वाञ्छनीयः इति बहुशः उक्तं ब्राह्मणरूपं धारयता शिवेन। सख्यौ जयविजये च पृष्टवत्यौ, "कोऽस्ति योग्यो वरः?" तदा शिव एकं दिव्यं महापुरुषं वर्णितवान्, यः वास्तविकतया सः स्वयमेव आसीत्। एषा सर्वाऽपि लीला शिवेन पार्वत्याः भक्तिपरिक्षणार्थं कृता।

**एकादशसर्गः** — एकादशसर्गे पार्वती शिवस्य निन्दां श्रुत्वा भक्तिपूर्वकं तं ब्राह्मणरूपिणं शिवं प्रणम्य नम्रतया उक्तवती यत् – "रामशिवयोः नाम्नोः श्रवणेनाहं कृतार्थाभवम्। श्रीरामः मम चित्ते, शिवः मे हृदये सदा वसतु"। एतदुक्त्वा अश्रुपूर्णा पार्वती शिवचरणयोः पतिता। ततः प्रसन्नः शिवः स्वं तेजोमयं रूपं

दर्शयित्वा पार्वत्यै वरं दातुं समभाषत – "यत्किञ्चिदपि दुर्लभं तुभ्यं प्रदास्यामि" इति। तस्मिन् क्षणे आकाशे पुष्पवृष्टिः, मङ्गलध्वनि, गानञ्चाभवत्। सर्वे देवाः, ऋषयः, गन्धर्वाः च स्तुत्यात्मकस्तोत्रपाठेन पार्वतीशिवौ पूजयाञ्चक्रुः।

**द्वादशसर्गः** — अस्मिन् सर्गे पार्वत्याः महतीं भक्तिं दृष्ट्वा शिवः स्वमायारूपं त्यक्त्वा दिव्यरूपं प्रकटयामास। तदा पार्वती मूर्च्छिता, भूमौ पतिता, परं शिवेन करुणया उद्धृता च। साऽपि शिवं दृष्ट्वा भक्तिपूर्वं तस्य स्तुतिं चकार — "त्वमेव सर्वं, जगतः आत्मा, मोक्षस्य साधनं च" इत्यादिना। तस्याः स्तुतिं श्रुत्वा त्रैलोक्ये मङ्गलध्वनिः, पुष्पवृष्टिः, देवगानञ्चाभवत्। पश्चाच्छिवः पार्वत्यै वरं दातुं तामुवाच — "त्वम् आत्मानं वरय"। पार्वत्या प्रणामपूर्वकम् उक्तम् — "मम पिता मे त्वयि दद्यात्" इति।

**त्रयोदशसर्गः** — अस्मिन् सर्गे दृश्यते यत् शिवपार्वत्योः विवाहाय योग्यम् अवसरं निश्चित्य, हिमालयः सप्तर्षीणां साहाय्येन महोत्सवं कर्तुं प्रवृत्तः। शिवः दिव्यरथेन देवगणैः सहागत्य, ब्रह्मविष्ण्वादीनां सान्निध्ये, ब्रह्मणः पौरोहित्येन विधिवत् विवाहकर्म समाचरत्। मेनादेव्याः पूर्वसंशयं सारस्वतवाक्यै अपाकृत्य हिमालयः स्वकन्यां पार्वतीं श्रद्धया शिवाय प्रादात्। उभयोः दिव्यरूपयोः दर्शनात् सभासदस्याः विस्मिताः अभवन्। गानं, वाद्यम्, नृत्यम् च महोत्सवस्य शोभां वर्धयामासुः। अन्ते त्रैलोक्यस्य शुभाय शिवपार्वत्योः पवित्रः परिणयः संपूर्णः जातः।

**चतुर्दशसर्गः** — चतुर्मुखो ब्रह्मा, चतुर्भुजो विष्णुश्च शिवस्य विवाहे मङ्गलवचनानि अवोचताम्। बृहस्पतिः हिमालयमवदत् यत् — "पार्वती धन्यास्ति, त्रिपुरान्तकं वरं प्राप्तवती"। देवगणाः तृप्ताः सन्तः स्वगृहं गतवन्तः। हिमालयः शिवाय कन्यां दत्त्वा गर्वमनुभूय — "योग्याय दत्ता कन्या दातारमुन्नयति" इति स्मरति। विवाहपश्चात् हिमालये सुवर्णप्रासादे महोत्सवः अभवत्। शयनकाले पार्वती लज्जया भीता, शिवस्तु तां करुणया सान्त्वयामास। ललाटनेत्रप्रभया सः सम्पूर्णं शयनगृहं प्रकाशितवान्। अन्ते पार्वती शिवस्य चरणयोः पतित्वानन्दमयी अभवत्।

**पञ्चदशसर्गः** — प्रातःकाले वैतालिकैः शिवपार्वत्योः स्तुतिः काव्यैः कृता। शिवस्य निद्रा विश्वस्य निद्ररूपा इति कथिता, यतो हि तस्य नेत्रनिमीलनेन रात्रिः, उन्मीलनेन दिनं भवति। स्नानानन्तरं स्त्रियः मंगलाचारं कृतवत्यः। एकदा मेनया पार्वत्याः श्वशुरगृहविषये पृष्टं वाक्यं तां खिन्नां कृतवती। सा मानिनी दुःखिता भूत्वा शिवाय निवेदितवती यत् वनं गच्छेयम्, पितृगृहं न। ततः शिवः तया सह हिमालयात् निर्गत्य स्वधाम जगाम। देवी शक्तिरूपा अपि तस्य पादयोः पतिता, सा महाशक्तिः, यस्याः कृपया शिवो मोक्षं ददाति। वाराणसीं प्रति गच्छन् शिवः तस्य महिमानं पार्वत्यै निगदितवान् यत् एषा पुरी ब्रह्मविष्ण्वादिभिरपि स्तोतुं न शक्या। सा मुक्तपुरी सदा तेजस्विनी अस्ति।

**षोडशसर्गः** — अत्र दृश्यते शिवः पार्वत्या सह वाराणसीं प्राप्य नगरवासिभिः प्रेम्णा समादृतो भवति। स्त्रीसमूहेन पार्वत्यै उपहाराः प्रदत्ताः, वाद्यनिनादैः, मङ्गलगीतैश्च नगरं गुञ्जितम्। मन्दारपारिजातादीनां पुष्पवृष्टिः अभवत्। विश्वकर्मणा निर्मिते रत्नमयगृहे शिवः सिंहासने उपाविशत्। ततः शिवः ब्रह्मादीन् आज्ञापयत् यत् रत्नैः उत्तमं नगरं निर्मीयताम् इति। ते च रत्नमयवाराणसीम् अद्भुतरूपेण क्षणेन एव निर्मितवन्तः। ततः देवासुरगन्धर्वादिभिः रत्नैः शिवः पूजितः। शिवः तान् लिङ्गप्रतिष्ठां कर्तुं समादिशत्। विष्णुः चक्रेण जलाशयं निर्मितवान्। अस्मिन् स्थले असंख्यानि लिङ्गानि, महाविद्याः, चामुण्डाद्याः देव्यः, भैरव्यः, प्रमथगणाः च स्थापिताः। एषा काशी मोक्षदायिनी पुरी शिवस्य प्रियतमस्थलम् इति।

**सप्तदशसर्गः —** सप्तदशसर्गे वर्णितमस्ति यत् शिवपार्वत्यौ त्रिपुरे प्रतिदिनं प्रातःकाले गङ्गायां स्नात्वा सूर्यपूजां कृत्वा, मौनेन स्वगृहं गच्छतः स्म। पूजायामुभौ आसनशुद्धिं, मातृकान्यासं, ध्यानमुद्रां च कुरुतः स्म। देवैः चन्दनाचले विविधोपहारैः पूजा समारब्धा। पार्वत्या कांस्यपात्रैः, शिवेन रजतपात्रैश्च पूजनं कृतम्। विचित्रधूपैः, पुष्पैः, दीपैः, नैवेद्यैः च पूजां सम्पूर्णां कृत्वा परस्परं प्रणम्य स्तुतिं चक्रतुः। ततः भक्तजनैः "शिव! शिव!" इति कीर्तनं, नर्तनं च कृतम्। सर्वत्र आनन्दस्य महाप्रवाहः अदरीदृश्यत।

**अष्टादशसर्गः —** अत्र तावदित्थमुक्तमस्ति यत् दिव्यैः देवगणैः परिवृते शिवपार्वत्यौ मध्याह्ने मणिकर्णिकायां स्नानं कृत्वा 'मणिकेश्वरं', 'गंगेश्वरं' च पूजितवत्यौ। पशुपतिनाथं विश्वेश्वरं च पूज्य हवनमपि कृतम्। नन्दिवृषं संतोष्य, ऋषीन् पूज्य, तुलसीवनं अभिषिच्य, विविधवृक्षान् अर्चितवत्यौ। ततः आगतान् मुनीन्, ब्रह्माणं, दैवतान्, अतिथीन् च सत्कारपूर्वकं सन्तर्पितवत्यौ। नन्दिना सूचितं रामागमनं श्रुत्वा, शिवः हर्षोत्कण्ठितः सन् शीघ्रं तं द्रष्टुं निर्गतः। गणैः सह रामस्य स्वागतार्थं सञ्जातो महान् कोलाहलः, यत्र शिवगणाः रामस्य महिमानं कीर्तयन्तः आसन्।

**ऊनविंशतिसर्गः —** उपान्तिमसर्गे रामस्य आगमनवार्तां श्रुत्वा शिवः हर्षविह्वलः पुष्पकविमानं समाश्रित्य रामं दृष्ट्वा प्रेम्णा आलिङ्गितवान्। तयोः समागमं दृष्ट्वा जनाः वर्षाशरद्भ्रान्तमेघयोरिव संगमम् अन्वभवन्। शिवः रामं पूजयन् तस्य नामस्मरणमेव मुक्तिदमिति प्रत्यपादयत्। रामेण सह लक्ष्मण-भरत-शत्रुघ्नान् चालिङ्ग्य, सीतायाः सत्काराय पार्वतीं समादिदेश। अन्नपूर्णादेव्याः प्रसादेन देवाः भक्ताः च तर्पिताः। त्रिपुरसुन्दरीपार्वत्या सह स्वयं विश्वेश्वरः अतीव प्रीतिपूर्वकं भोजनं कृतवान्। अन्नप्रसादं प्राप्य एकः दरिद्रब्राह्मणः अपि तत्क्षणं मोक्षमवाप।

**विंशतिसर्गः —** अन्तिमसर्गे उल्लिखितं यद् तदनन्तरं शिवपार्वत्यौ ताम्बूलं स्वीकृत्य परस्परं हास्यं कुर्वत्यौ अदृश्येते। शिवस्य आज्ञया देवाः स्वगृहाणि गत्वा शय्यासु उपविष्टाः। तृतीयायामे सभायां देवाः रत्नप्रभाभिः उज्ज्वलायाम् उपविष्टाः। रामायणं महाभारतं च श्रुत्वा शिवं देवाः प्रसन्नं कुर्वन्ति स्म। शिवपार्वत्योः आनन्दः मङ्गलैः स्तोत्रैः संगीतैः च वर्धितः। रात्रौ मध्यरात्रौ चन्द्रशेखरः रहस्यमयीं क्रीडामकुर्वन्। पार्वत्याः प्रतिविम्बं दृष्ट्वा शिवः खिन्नः अभवत्, तदा प्रेममिलनम् अभवत्। विश्वेश्वरः सर्वदेवान् समाश्वास्य अभिषिक्तः, भक्तानां कृपां करोति स्म।

**उपसंहारः —**

श्रीबाणेश्वरविद्यालङ्कारभट्टाचार्यः विभिन्नानाम् अलंकाराणां विन्यासे अतीव निपुणः आसीत्। विशेषतः विरोधाभास-उपमा-रूपकम्-अनुप्रासः-इत्यादीनाम् अलङ्काराणां प्रयोगे कविः सिद्धहस्तः आसीत्। काव्यसौन्दर्याय शार्दूलविक्रीडितम्-उपजाति-इन्द्रवज्रा-उपेन्द्रवज्रा-वसन्ततिलका-सुन्दरी इत्यादीनां छन्दसां सम्यक् योजनं कविना कृतम्।

"अभयापि भयातिशोभना
त्रिपुरापि त्रिपुरान्तकप्रिया ।
अगजापि गजाननप्रसू-
र्भजतां कल्पलतास्तु भूतये।।"

सुन्दरशब्दविन्यासः, समुचितभावनिर्वाहः, प्रकृतिचित्रणम्, अपूर्वकल्पना चास्य महाकाव्यस्य शोभां वर्धयन्ति। नूतनानां शब्दानां प्रयोगे कविः अद्वितीयः आसीत्। वर्णनायाः वैचित्र्यं शब्दार्थयोः वैभवं चास्मिन् महाकाव्ये सर्वत्र दरीदृश्यते। श्रीबाणेश्वरविद्यालङ्कारभट्टाचार्यमहोदयस्य रहस्यामृतमहाकाव्ये

पाण्डित्यवैदग्ध्यकवित्वानां त्रिवेणीसङ्गमः बोभूयते।

## Bibliography


- विद्यालङ्कारः बाणेश्वरः। रहस्यामृतम्। सम्पा० अभिजित् मण्डलः। अप्रकाशितः हस्तलिखितपाण्डुलिपिः।
- श्रीमती मिनतिरथ । शिवतत्त्वविमर्शः। पुरी । शतरुपा पब्लिकेशनस् । २०१६
- विश्वनाथकविराजः। साहित्यदर्पणम्। सम्पा० बिमलाकान्त मुखोपाध्यायः। कोलकाता। संस्कृतपुस्तकभाण्डार। २०१३
- मम्मटः। काव्यप्रकाशः। सम्पा० सत्यव्रतसिंहः। वाराणसी। चौखम्बा विद्याभवनम्। २००७
- घटकः कालिमयः। चरिताष्टक। श्रीयुक्तः एच्. एम्. मुखोपाध्यायः एण्ड् कम्पनी। १२८९
- बन्ध्योपाध्यायः हरिचरणः। संस्कृत साहित्येर इतिबृत्त। कोलकाता। विश्वभारती। १९५०
- शिवपुराणम्। सम्पा० पृथ्वीराजसेनः। कोलकाता। गिरिजा लाइब्रेरी। २०१९
- लिङ्गमहापुराणम्। सम्पा० पण्डित द्वारकाप्रसाद मिश्रशास्त्री। गोरखपुरः। गीताप्रेस्। २००७
- अग्निपुराणम्। वाराणसी:। चौखम्बा संस्कृत संस्थानम्। १९६६
- वायुपुराणम्। सम्पा० शिवजितसिंहः। वाराणसी। चौखम्बा विद्याभवनम्। २०१३
- स्कन्दपुराणम्। सम्पा० एस्. एन्. खण्डेलवालः। वाराणसी: चौखम्बा प्रकाशनम्। २०१६

Journal

- भट्टाचार्यः उमेशचन्द्रः। साहित्य परिषद् पत्रिका। वर्षः ४९। द्वितीया संख्या। १३४९।


—